श्री निंबाद्री लक्ष्मीनृसिंह सुप्रभातं

कौसल्या सुप्रजाराम पूर्वसंध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमान्हिकं ॥

उत्तिष्ठोत्तिष्ठ लक्ष्मीश निंबाद्रिनिलयाच्युत ।
उत्तिष्ठ नरहर्यक्ष त्रैलोक्यं मंगलं कुरु ॥

मातर्विरंचिमुख विश्वचराचराणां
वैकुंठमंदिर मनोहर दीपरेखे ।
वंदारुभक्तजनवांछितदानशौंडे
निंबाद्रिनाथ दयिते तव सुप्रभातं ॥ 1॥

तव सुप्रभातमखिलार्थसाधिके
मधुवैरिपलिजलजातपुत्रिके ।
नवपुंडरीकदलदीर्घनेत्रिके
वर निंबशैलपतिभाग्यजीविके ॥ 2॥

वसिष्ठ कुंभभवभव्यतपःप्रभाव
कौंडिण्यसिद्धऋषयः कृतकल्यकृत्या ।
नैहीं तनुं तव विलोकयितुं प्रविष्टाः
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 3॥

प्रह्लादनारदमुखाः परतत्त्वविज्ञाः
प्रातर्विधि परिसमाप्य समागतास्ते ।
पंकेरुहैस्तव पदौ परिपूजनाय
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 4॥

सेनेशशेषगरूडादिसमस्तनित्याः
दिव्यानि भूरि विरजा जलजानि नीत्त्वा ।
प्राप्तास्त्वदीय पदपंकजपूजनाय
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 5॥

सन्निंबवृक्षसमुसंगि समीरडिंभाः
शीतैर्लतांतमकरंदकणैश्च युक्ताः ।
मंदं प्रवाति तव कंदरमंदिरांते
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 6॥

मार्तंडमंगलकरस्फुटपद्ममध्यात्
भृंगाः प्रकर्षमधुपानविशेषमत्ताः ।
गच्छंति पुष्पमनुपुष्पमदभ्रगीत्या
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 7॥

त्वं क्षेत्रगोत्रपरितस्थितघोषयोषाः
मध्नंति मंगलरवं दधिचंद्रिकाभं ।
तध्वांतमुक्ततमसः ककुभः प्रभांति
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 8॥

श्रीनिंबशैलवरकंदरमंदिरांतः
विद्योतमान रमणीय रमाश्रितांक ।
राकासुधाकरसहश्च निभास्य शोभा
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 9॥

पद्मालया सरसि नित्य कृतावगाहा
शुद्धश्च वासवमुखा सुरभक्तसंघाः ।
तिष्ठंति दार्वि तव भैरवभक्तरुद्धाः
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 10॥

श्रीनिंबशैल पिचुमर्थक पुण्यभूभृ
निंबाद्रि निंबगिरिमालक गोत्रनाम्ना ।
नित्यं वदंति निपुणास्तव गोत्रराजं
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 11॥

दुष्टं स्वपुत्ररिपुमुद्धतगर्वमत्तं
स्तंभे रमं कनककश्यपु नामधेयं ।
हर्तुं नृसिंहवपुषा सुषुषाविराज
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 12॥

भक्तस्य वागवितथं सततं प्रकर्तुं
सर्वेषु वस्तुषु च नित्यमदभृवृत्तिं ।
संदर्शयन् दनुजनालकृतावतार
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 13॥

आदित्यसोमकुजसौम्य सुरार्यशुक्र
स्वर्भानुकेतुमुखदिव्यनवग्रहास्ते ।
तिष्ठंति दास्यमिह कर्तुमतंद्रभावाः
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 14॥

मालूररूपधर कालहारौ च वायु
रिंद्रोथ नैऋतिमुखाः ककुभीशदेवाः ।
तद्वास्थदंडहतिमंडितशीर्षदेशाः
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 15॥

त्वत्कंदरोपरि लसच्छिखराग्रभागं
दृष्टवा प्रहृष्टमनसो भवभीतिबाधान् ।
त्यक्त्वा भजंति भवदीय नगाधिराजं
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 16॥

श्री धर्मपालनृपविप्र विरंचिरुद्र
त्रैशंकुसंगत महाषु विनाशकारिन् ।
भक्तैकभोग्य गुणमंगल धामनामन्
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 17॥

लक्ष्मीनृसिंह नखरायुध वीरसिंह
गीर्वाणसिंह गिरिशाषुविभंगवहः ।
दैत्येयजिह करिकुंभ विघातसिंह
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 18॥

प्रह्लादपालक परात्परपापनाश
पिंगाक्ष पुण्यजन पीवर तुंगभंग ।
पद्मालयार्चित पवित्रपदारविंद
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 19॥

श्रीमान् श्रितार्तिहरसिंधुसुतामनोब्ज
लोलंब पत्ररथशंखरथांगपाणे ।
वात्सल्यपूर्ण वरदायक वासुदेव
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 20॥

श्रीमान्नृसिंह सुसटाब्द वृताब्जवक्त्रा
दंष्ट्रोरुदंतनखशस्त्रधरत्रिनेत्र ।
चंचल्लगुद्रसनगर्जितनिर्जितारे
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 21॥

वैकुंठसीम्नि वितता विरजा सुधोद्या
लीलाविभूतिमधिगम्य पदाश्रिता ते ।
मोक्षप्रदेति विदिता रुचिरप्रवाह
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 22॥

श्रीबेमुगल्पुरसमागतवेदरूपाः
ते माध्ववैष्णवगणाः शतशो वसंति ।
नेत्त्वा पयोद्य कमलालमला करीय्यं
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 23॥

लक्ष्मीपते नरहरे नखदंष्ट्रशालिन्
दारिद्र्यदावदहन क्षमकालमेघ ।
भक्तार्तिभंजन बहुप्रदशेषशायिन्
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 24॥

प्रह्लादकारिज यतींद्र नरादि मौनि
नारायणानिल तनुजवरैश्च लक्ष्म्या ।
ताक्षर्येण भैरवमुनींद्रगणैश्च सेव्य
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 25॥

कल्याणरूप कमलाश्रितवत्सभाग
कंदर्पकोटि सुकुमार करालदंष्ट्रा ।
कारुण्यपूर्ण घनकौस्तुभरत्नहार
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 26॥

कार्तिकमासशरदिंदु विकासपूर्ण
राकातिथौ तव रथोत्सवसेवनाय ।
प्रत्यब्दमब्जभव वृंदमितोभियाति
निंबाद्रिनाथ नृहरे तव सुप्रभातं ॥ 27॥

श्रीनिंबशैल नृहरेरिह सुप्रभातं
लिंगापुरीनिलय लक्ष्मणनामकेन ।
भक्त्याकृतं प्रतिदिनं सरसं पठंति
तेषां ददाति नृहरिर्धनपुत्रभोगान् ॥ 28॥

इति श्रीनिंबाद्रीलक्ष्मीनृसिंह सुप्रभातं संपूर्णं ।
श्रीलक्ष्मीनृसिंहार्पणमस्तु ।